श्रीविद्यारण्य - विद्यापीठ - ग्रन्थावलिः—२

रामायणरहस्यम्

Sri – Ramayana - Rahasyam



Published by

VIDYĀRAṆYA-VIDYĀ-PIṬHA TRUST


HOSPET - HAMPI

1982

Copy Right
I Edition
1000 Copis

Lakshmi Vijayam Press, 3, Bharathi Salai,
Triplicane, Madras - 600 005.

VIDYARANYA — PROCESSION



(From an Old Painting in Virupaksha Temple)

— By Courtesy of Directorate of Archaeology, Mysore.

.....सहैश्वर्य सवाहनम् ।

विद्यारण्यगुरुस्वामी कैलासालयमाविशत् ॥

[Quoted by Mahamahopadhyaya Kokkandram Venkatratnam Pantulu, (Professor of Telugu, Presidency College, Madras), in his work-'Saṅkara Matha-Tatvaprakāsikārthā-Saṅgrahaḥ'—Printed at the Sanjivini Press, Peddunaickenpet, Madras—1877 - A. D.]

THE RĀMĀYAṆA - RAHASYA OF ŚRĪ - VIDYĀRAṆYA

INTRODUCTION :—

The Rāmāyaṇa Rahasya of Vidyārāṇya is now published for the first time as a booklet in Nagari script. The colophon at the end of the manuscript makes it clear that the author Vidyāraṇya was the pupil of one Mādhavāraṇya.

The Rāmāyaṇa-Rahasya starts with the enumeration of qualities implied by the syllables of the Gāyatri in stanzas 1 to 18 and the letters of the Gāyatri in stanzas 22 to 46. In stanzas 47 to 59, letters of the Gayatri are shown as exhibited within the first (the Saṃkṣepa) sarga of the Bāla-kānda in accordance with the appropriate qualities as narrated by Nārada. And it is added that the letters herein, though not of the full quantity they possess as Gāyatry-yaksharas are still recognisable in the main as Gāyatri aksharas or akin to Gāyatryakṣaras From stanza 63 onwards, the author quotes the stanzas in the body of the Rāmāyaṇa wherein the Gayatrayaksaras occur in the first stanza of each of the twenty-four thousands stanzas. It has to be noted that in these stanzas the Gāyātryakṣaras do not occur as the first letter of the stanzas in question but they are distributed in the middle, end or beginning. But these twenty-four stanzas, from 63 to 87, are generally quoted as the Gāyātri-Rāmāyaṇa.

Vidyāraṇyas Rāmāyaṇa - Rahasya is preserved in full in Govindarāja's famous commentary on the Rāmāyaṇa and the Tatva-saṁgraha-Rāmāyaṇa, written by Rāmabrahmānandasarasvati, the pupil of Svayaṃprakaśanandasaravati. The fifth chapter of this latter work quotes bodily the whole of the text contained in the Rāmāyaṇa-Rahasya, referring to it as the work of Vidyāraṇya.

The Vidyāraṇya-Vidyā-Pitham Trust is striving its best to make available to the public as many of the books. attributed to the sage Vidyāraṇya, who flourished in 14th Century A.D. and who, among the Scholars and Savants has given to the world authoritative treatisies on almost all branches of human culture, comprising of varied literature — Vyākaraṇa (linguisties) Mimāmsa (Rules of interpretation of Vedas) Music, Medicine, Astronomy, Law, Jurisprudence, Guidance to God—Realisation, and commentaries on the ever inexhaustible and mosity unexplored lore of the extant Vedas.

VIDYĀRAṆYA-VIDYĀ-PIṬHA

Hospet - Hampi

॥ श्रीः ॥

श्री विद्यारण्यमुनिवरविरचितं

॥ श्री रामायणरहस्यम् ॥

गुणाढ्यत्वं कारणत्वं शरण्यत्वं प्रकाशता ।
प्रकाशित्वं च निखिलैर्ध्येयता च नियन्तृता ॥ १ ॥

एते ब्रह्मगुणा नित्या गायत्रीपदबोधिताः ।
प्रथमेन गुणाढ्यत्वं द्वितीयेन च लक्षणम् ॥ २ ॥

तृतीयेन शरण्यत्वं चतुर्थेन प्रकाशता ।
षष्ठमेन पदेनैव प्रकाशित्वं प्रबोध्यते ॥ ३ ॥

षष्ठेन ध्येयताऽथान्त्यैश्चतुर्भिश्च नियन्तृता ।
श्रीसंक्षेपेऽपि दृश्यन्ते मन्त्रवाच्या इमे गुणाः ॥ ४ ॥

को न्वस्मिन् सांप्रतं लोक इत्यारभ्य विशेषतः ।
उक्ता गुणाढ्यता विष्णोः श्लोकैरष्टादशैः स्फुटम् ॥ ५ ॥

गुणप्रकरणेऽत्रैवाप्युक्ताः कारणतादयः ।
प्रजापतिसमः श्रीमान् धातेति स्रष्टृतेरिता ॥ ६ ॥

संहर्तृता चात्र रिपुनिषूदन इतीरिता ।
रक्षिता जीवलोकस्येत्यादिना स्थितिकर्तृता ॥ ७ ॥

इत्थं कारणताऽनेन श्लोकेन प्रतिपादिता ।
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ॥ ८ ॥

इत्यादिषु शरण्यत्वं शरण्यस्याभिधीयते ।
ज्ञानसंपन्न इत्यत्र प्रकाशत्वं प्रदृश्यते ॥ ९ ॥

ज्ञानत्वेनैव संपन्न इति ज्ञानात्मतेरिता ।
नो चेत्सर्वज्ञशब्देन पुनरुक्तिर्भवेदिति ॥ १० ॥

सर्वज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
इत्यत्र स्थितसर्वज्ञपदेनोक्ता प्रकाशिता ॥ ११ ॥

यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ।
इत्यत्र वश्यशब्देन भक्तवश्यत्ववाचिना ॥ १२ ॥

ध्येयत्वं च गुणो विष्णोरर्थतः प्रतिपादितः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ १३ ॥

इत्यत्र वशिशब्देन बोध्यते च नियन्तृता ।
वृत्तान्ते यौवराज्यादौ सूच्यन्ते त इमे गुणाः ॥ १४ ॥

सामान्येन गुणाढ्यत्वं सुस्पष्टं तत्र तत्र च ।
शबरीशरभङ्गादिवृत्तान्ते स्थितिकर्तृता ॥ १५ ॥

दशग्रीववधाद्ये तु वृत्तान्ते लयकर्तृता ।
इत्यादौ जन्मकर्तृत्वं समुत्थाप्य च वानरान् ॥ १६ ॥

विभीषणादिवृत्तान्ते शरण्यत्वं प्रकाशितम् ।
निग्रहानुग्रहत्वाभ्यामीशत्वं तस्य बोधितम् ॥ १७ ॥

इत्यत्रार्थाद्धचेयता च पूजितः सर्वदैवतैः ।
चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ।
इत्यादिषु नियन्तृत्वमित्यर्थः सांप्रदायिकः ॥ १८ ॥

अत्रेदं मानमुक्तार्थसंप्रदायनियामकम् ।
प्रबन्धाद्यन्तयोर्दृष्टे गायत्र्याद्यन्तिमाक्षरे ॥ १९ ॥

उक्तार्थविषयाच्चान्यो विशेषः सांप्रदायिकः ।
अस्ति गुह्यतमः सोऽपि विस्तरेण प्रकाश्यते ॥ २० ॥

प्रणम्य माधवारण्यं तत्प्रासादुपदेशतः ।
व्याकरोम्यत्र गायत्रीमन्त्रवर्णान् पृथक् पृथक् ॥ २१ ॥

आदिवर्णो हरेर्वक्ति सत्यज्ञानादिकान् गुणान् ।
तद्गुणे प्रकृतार्थोक्तौ ब्रह्महेत्वोरिति स्मृतेः ॥ २२ ॥

सश्च सत्यप्रतिज्ञत्वं वक्ति सः पुंस्युमासुते ।
वायौ ज्ञाने बुधे सत्यप्रतिज्ञायामिति स्मृतेः ॥ २३ ॥

पराभिभूतिसामर्थ्यं विकारेण विबोध्यते ।
विश्वक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि ॥ २४ ॥

वैश्ये विजयसामर्थ्ये विशेषेऽर्क इति स्मृतेः ।
तुकारेणोच्यते विष्णोश्चक्राद्यायुधसंग्रहः ॥ २५ ॥

तुरायुधे तदादाने चोरे कान्ताविति स्मृतेः ।
वक्ति पूर्ववकारोऽयं हरेरभयदायिताम् ॥ २६ ॥

वोभीनिवारणे पूज्ये सान्त्वे काम इति स्मृतेः ।
रेकारस्तु भगवतो वक्ति भक्तनिषेव्यताम् ॥ २७ ॥

रेशब्दः पावके कामे भक्तसेव्य इति स्मृतेः ।
णिकारो ब्रह्मणो वक्ति दीनानाथशरण्यताम् ॥ २८ ॥

णः शरण्यकृपाशूरभीतिपद्येष्विति स्मृतेः ।
यकारः पूर्वपादान्तो मित्रविश्वासवाचकः ॥ २९ ॥

यस्त्यागे निलये कामे दातरीशे च धातरि ।
भीत्यभावे यमे मित्रे विश्वासेऽग्नाविति स्मृतेः ॥ ३० ॥

बलाविष्करणं विष्णोर्भकारेण प्रकाश्यते ।
मः शंभौ श्रमणे भावे सत्वव्यक्ताविति स्मृतेः ॥ ३१ ॥

आश्रितानन्दकारित्वं गकारेणाभिधीयते ।
गश्च हर्षप्रदे गीते गन्धर्वोक्ताविति स्मृतेः ॥ ३२ ॥

देकारेण वकारेण सर्वपूज्यत्वमुच्यते ।
देकारो दातरि च्छेदे पूज्ये दानकलत्रयोः ।
वो भीनिवारणे पूज्ये सान्त्वे काम इति स्मृतेः ॥ ३३ ॥

स्यशब्देनोच्यते विष्णोर्दीनदुःखापनोदनम् ।
स्या गुणे स्यं भवे स्यस्तु दुःखहानाविति स्मृतेः ॥ ३४ ॥

घीशब्दस्तु भगवतो धर्मस्थापनवाचकः ।
घीस्तु धर्मपदे धर्मे धृतिज्ञप्त्योरिति स्मृतेः ॥ ३५ ॥

आधिव्याधिहरत्वार्थं मश्च हिश्चाक्षरे उभे ।
मोऽग्नौ जीवे व्याधिनाशे धातरीन्दौ च मा श्रियाम् ॥ ३६ ॥

हिस्तु व्याधिपरीहारे वैद्ये हेताविति स्मृतेः ।
धीशब्दाच्छुभसद्वृत्त्योर्हेतुत्वमभिधीयते ॥ ३७ ॥

धीस्तु विद्यात्मकल्याणसदाचारेष्विति स्मृतेः ।
नानाभीत्यपहारित्वं यद्वयेनाभिधीयते ॥ ३८ ॥

यस्त्यागे निलये कामे दातरीशे च धातरि ।
भीत्यभावे यमे मित्रे विश्वासेऽप्याविति स्मृतेः ॥ ३९ ॥

विष्णोरत्राखिलैश्वर्यप्रदत्वं वक्ति नः पदम् ।
अस्मदर्थे सर्वलोकश्रीदाने युधि नः पदम् ॥ ४० ॥

ना पुमान् नौर्जलोत्तारे नेत्यभाव इति स्मृतेः ।
निःसीमाभ्यधिकस्थानप्राप्तिरुक्ता प्रशब्दतः ॥ ४१ ॥

प्रो जटायां प्रकृष्टार्थस्थानप्राप्ताविति स्मृतेः ।
सर्वलोकनियन्तृत्वं चोशब्देनाभिधीयते ॥ ४२ ॥

समुच्चये चेतिशब्दश्चोशब्दश्च नियन्तरि ।
चस्तुलुप्के खरे चोरे पुंश्चकोर इति स्मृतेः ॥ ४३ ॥

[1]सर्वलोकाधिपत्यं हि विष्णोरुक्तं दशब्दतः ।
दं कलत्रेषु दः सर्वलोकाधिप इति स्मृतेः ॥ ४४ ॥

समस्तफलदातृत्वं यादित्यन्तिममक्षरम् ।
यात् स्त्रियां पदपञ्जर्योर्यिद्धेतौ यात् फलप्रदे ॥ ४५ ॥

---

1. क. ख. विभूतिद्वितयैश्वर्यमुक्तं विष्णोर्दशब्दतः ।

यमित्यव्ययमोंकारे शोभालक्ष्म्योरिति स्मृतेः ।
एवमेते ब्रह्मगुणा गायत्रीवर्णबोधिताः ॥ ४६ ॥

———

प्रकाश्यन्ते रामकथासंग्रहे नारदेरिते ।
तत्तद्गुणपरे ग्रन्थे ते ते वर्णाः समुद्धृताः ॥ ४७ ॥

तदित्यस्यैकदेशस्तु प्रबन्धादौ समुद्धृतः ।
तद्योयंधीणिनश्चो च वर्णास्त्वत्रार्धमुद्धृताः ॥ ४८ ॥

केचिद्वर्णास्त्वेकदेशे रहस्ये चात्मभूद्धृताः ।
बान्तात् पूर्वो वर्ण इति नान्तो तः पदमित्यपि ॥ ४९ ॥

स जगाम वनं वीर इत्यत्रैव स उद्धृतः ।
विराधं राक्षसं हत्वेत्यत्र विश्च समुद्धृतः ॥ ५० ॥

खड्गं च परमप्रीतस्तूणी चेत्यत्र तुः कृतः ।
वसतस्तस्य रामस्येत्यादिग्रन्थे व उद्धृतः ॥ ५१ ॥

संगतो वानरेणेति स्थले रेकार उद्धृतः ।
हनुमद्वचनाच्चैव सुग्रीवेणेति तत्र णः ॥ ५२ ॥

सुग्रीवायेत्यत्र पदे यंवर्णस्यार्धमुद्धृतम् ।
उत्स्मीयत्वेत्यस्य पूर्वं मकारश्च समुद्धृतः ॥ ५३ ॥

ततोऽगर्जद्धरिवर इत्यत्रैव विभाति गः ।
अभिषिच्येत्युत्तरत्र वोऽस्ति देकारपूर्वकः ॥ ५४ ॥

भरतस्यान्तिकं राम इत्यत्र स्येति चाक्षरम् ।
एकदेशेन घीकारः सुधार्मिक इति स्थले ॥ ५५ ॥

निरामयो ह्यरोगश्चेत्यत्र मश्च हिकारयुक् ।
नार्यश्चाविधवेत्यत्र घीशब्दश्चैकदेशतः ॥ ५६ ॥

न चाग्निजं भयं किंचिदिति श्लोके तु यद्वयम् ।
नगराणि च राष्ट्राणीत्यत्र नः पदमुद्धृतम् ॥ ५७ ॥

अश्वमेधशतैरिष्ट्वेत्यादिश्लोके प्र उद्धृतम् ।
चोवर्णस्त्वेकदेशेन चातुर्वर्ण्यमिति स्थले ॥ ५८ ॥

दशवर्षसहस्राणीत्यक्षरोपान्त उद्धृतः ।
समुद्धृतं प्रबन्धान्ते गायत्रीचरमाक्षरम् ॥ ५९ ॥

वाल्मीकिरत्र सिद्धार्थान् व्याचकार सुविस्तरम् ।
पूर्णं रामायणं श्लोकैश्चतुर्विंशत्सहस्रकैः ॥ ६० ॥

श्लोकोऽयं तप इत्यादिस्तत्प्रबन्धस्य चादिमः ।
सुप्रतिष्ठित इत्यन्तं श्रीमद्रामायणं विदुः ॥ ६१ ॥

प्रतिश्लोकसहस्रादौ मन्त्रवर्णाः समुद्धृताः ।
चतुर्विंशत्सहस्राणामाद्यश्लोकाः पृथक् पृथक् ।
क्रमेण दर्शयिष्यन्ते गायत्र्यक्षरगर्भिताः ॥ ६२ ॥

श्रीमद्बालकाण्डे प्रथमसर्गादौ—

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् ॥ १ ॥

त्रिंशे सर्गे—

स तेन परमास्त्रेण मानवेन समाहितः ।
संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १८ ॥

त्रिषष्टितमे सर्गे—

विश्वामित्रो महातेजा भूयस्तेपे महातपाः ।
ततः कालेन महता मेनका परमाप्सराः ॥ ३, ४ ॥

अयोध्याकाण्डे चतुर्दशे सर्गे—

चतुरश्वो रथ श्रीमान्निर्स्त्रिंशो धनुरुत्तमम् ।
वाहनं नरसंयुक्त छत्रं च शशिसंनिभम् ॥ ३७ ॥

चतुश्चत्वारिंशे सर्गे—

वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन् सदाऽनघः ।
दयावान् सर्वभूतेषु लाभस्तस्य महात्मनः ॥ ५ ॥

एकसप्ततितमे सर्गे—

द्वारेण वैजयन्तेन प्राविशच्छान्तवाहनः ।
द्वाःस्थैरुत्थाय विजयं पृष्टस्तैः सहितो ययौ ॥ ३३, ३४ ॥

एकोनशततमे सर्गे—

उटजे राममासीनं जटामण्डलधारिणम् ।
[1]तं तु कृष्णाजिनधरं चीरवल्कलवाससम् ॥ २५ ॥

श्रीमदारण्यकाण्डे द्वादशे सर्गे—

ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् ।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥

सप्तचत्वारिंशे सर्गे—

मम भर्ता महातेजा वयसा पञ्चविंशकः ।
अष्टादश हि वर्षाणि मम जन्मनि गण्यते ॥ १०, ११ ॥

श्रीमत्किष्किन्धाकाण्डे चतुर्थे सर्गे—

ततः परमसंहृष्टो हनुमान् प्लवगर्षभः ।
प्रत्युवाच ततो वाक्यं रामं वाक्यविशारदः ॥ ३ ॥

एकत्रिंशे सर्गे—

स कामिनं दीनमदीनसत्त्वं शोकाभिपन्नं समुदीर्णकोपम् ।
नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच ॥ १ ॥

श्रीमत्सुन्दरकाण्डे प्रथमसर्गादौ—

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

---

१. कृष्णाजिनधरं तं तु इति मुद्रिते कोशे

सप्तविंशे त्रिजटास्वप्ने—

[1]ततस्तस्य नगस्याग्र आकाशस्थस्य दन्तिनः ।
भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १४ ॥

षट्चत्वारिंशे सर्गे—

नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः ।
दृष्टा हि हरयः सर्वे मया विपुलविक्रमाः ॥ ९, १० ॥

श्रीमद्युद्धकाण्डे प्रथमसर्गादौ—

श्रुत्वा हनुमतो वाक्यं यथावदभिभाषितम् ।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥

अष्टाविंशे रावणं प्रति शुकः—

रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ।
श्रीमता राजराजेन लङ्कायामभिषेचितः ॥ २७ ॥

पञ्चाशे नागपाशविमोचनसमये—

तेजो वीर्यं बलं चौज उत्साहश्च महागुणाः ।
प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणं तयोः ॥ ४० ॥

अष्टषष्टितमे सर्गे उत्तरभागादौ—

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना ।
राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ १ ॥

---

१. ह्याकाशस्थस्य इति मुद्रित कोशे

एकाशीतितमे—

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः ।
[1]संनिवृत्याहवात् तस्मात् प्रविवेश पुरीं तदा ॥ १ ॥

द्वादशशततमे—

मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ।
क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ २६ ॥

श्रीमदुत्तरश्रीरामायणे प्रथमसर्गादौ—

प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते ।
आजग्मू ऋषयः सर्वे राघवं प्रतिनन्दितुम् ॥ १ ॥

द्वाविंशे सर्गे—

[2]ततः प्राचोदयत् सूतस्तान् यान् हारुचिरप्रभान् ।
प्रययौ भीमसंनादो यत्र रक्षःपतिः स्थितः ॥ ८ ॥

एकचत्वारिंशादौ—

विसृज्य च महाबाहुः ऋक्षवानररक्षसान् ।
भ्रातृभिः सहितो रामः प्रमुमोद सुखं सुखी ॥ १ ॥

अष्टसप्ततितमे रामं प्रत्यगस्त्यः—

ब्राह्मणस्य च धर्मेण त्वया वै जीवितः सुतः ।
उष्यतां चैव रजनीं सकाशे मम राघव ॥ २७, २८ ॥

---

१. ततः मु० पा० २. प्रचोदयन् मु० पा० त्वया जीवायितः सुतः मु० पा०

प्रबन्धान्तश्लोकः—

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥

चतुर्विंशत्सहस्राणामाद्याः श्लोका इमे क्रमात् ।
एषु श्लोकेषु दृश्यन्ते मन्त्रवर्णा यथाक्रमम् ॥

दृश्यते च प्रबन्धान्ते मन्त्रान्तव्यञ्जनाक्षरम् ।
तस्मादिदं त्वादिकाव्यं गायत्रीं महतीं विदुः ॥

इत्येतदादिकाव्यार्थरहस्यं सांप्रदायिकम् ।
विद्यारण्यमुनीन्द्रेण दर्शितं विदुषां मुदे ॥

इति श्रीमत्परमहंसपरिव्राजकपरिवृढेन माधवारण्य-
मुनिवरदयालब्धप्रबोधेन श्रीविद्यारण्यमुनीश्वरेण प्रकाशितं

श्रीमद्रामायणरहस्यं संपूर्णम् ॥

---

1. क विद्यारण्यमुनिर्ब्रह्मविदा प्राकाशयन्मुदा ॥ पाठान्तरम्
2. ख. गायत्र्याः श्रुतिमातुरर्थमखिलं प्रत्यक्षरं व्याकरो-
देकैकस्य सहस्रमारचितवान्ग्रन्थांश्च रामायणे ।
आलोड्याखिलवेदसारमसकृद्यत्तारकं ब्रह्म तद्
रःमो विष्णुरहस्यमूर्तिरिति यो विज्ञाय वल्मीकभूः ॥
(अधिकः पाठः)

अनुबन्धः (१)

श्लोकार्धानुक्रमः

अत्रेदं मानमुक्तार्थम्	7	उटजे राममासीनं	13
अभिषिञ्चेत्युत्तरत्र	10	उष्यतां चैव रजनीं	15
अखमेघरातैरिष्ट्वा	11	उत्स्मीयत्वेत्यस्य	10
अष्टादश हि वर्षाणि	13	एकदेशेन धीकारः	11
अस्ति गुह्यतमः सोऽपि	7	एते ब्रह्मगुणा नित्या	5
अस्मदर्थे सर्वलोक०	9	एवमेते ब्रह्मगुणाः	10
आजग्मू ऋषयः सर्वे	15	एषु लोकेषु दृश्यन्ते	16
आदिवर्णो हरेर्वक्ति	7	कुम्भकर्ण हतं दृष्ट्वा	14
आधिक्याधिहरत्वार्थं	8	केचिद्वर्णास्त्वेकदेशे	10
आश्रितानन्दकारित्वं	8	कोऽन्वस्मिन् सांप्रतं	5
इत्यत्र वशिब्देन	6	क्रमेण दर्शयिष्यन्ते	11
इत्यत्र वश्यशब्देन	6 12	क्रियतामस्य संस्कारः	15
इत्यत्र स्थितसर्वज्ञ	6	खड्गं च परमप्रीतः	10
इत्यत्रार्थाद् ध्येयता	6	गश्च हर्षप्रदे गीते	8
इत्यादिषु नियन्तृत्वं	6	गुणप्रकरणेऽत्रैष	5
इत्यादिषु शरण्यत्वं	5	गुणाढ्यत्वं	5
इत्यादौ जन्मकर्तृत्वं	6	चतुरवो रथः	12
इत्येतदादिकाव्यार्थं	16	चतुर्दिशत्सहस्राणाम्	11
इत्थं कारणतानेन	5	चस्तुलुप्ते खरे	9
इत्येष पदमन्वेषु	13	चातुर्वर्ण्यं च लोके	6
उक्ता गुणाढ्यता	5	चोवर्णस्त्वेक देशेन	11
उक्तार्थं विषयात्	7	ज्ञानत्वेनैव संपन्नः	6

ज्ञानसंपन्न इत्यत्र	5
णः शरण्यकृपाशूर०	8
णिकारो ब्रह्मणः	8
तं तु कृष्णाजिनधरं	13
ततः कालेन महता	12
ततः परमसंहृष्टः	13
ततः प्राचोदयात् सूतः	15
ततस्तस्य नगस्य	14
ततोऽगर्जद्धरिवर	10
ततो रावणनीतायाः	13
तत्तद्गुणपरे ग्रन्थे	10
तपः स्वाध्यायनिरतं	12
तदित्यस्यैकदेशस्तु	10
तद्गुणे प्रकृतः	7
तस्मादिदं त्वादिकाव्यं	16
तद्योयंधीणिनश्चो च	10
तेजो वीर्यं बलं चैव	14
ते वयं वनमत्युग्रं	13
तुकारेणोच्यते	7
तुरायुधे तदादाने	7
तृतीयेन शरण्यत्वं	5
दं कलत्रेषु दः	9
दयावान् सर्वभूतेषु	12
दशग्रीववधाद्येतु	6
दशवर्षसहस्राणि	11
दृश्यते च प्रबन्धान्ते	16
दृष्टा हि हरयः सर्वे	14
देकारेण वकारेण	8
देकारो दातरि	8
द्रष्टुमिच्छामहे सर्वे	13
द्वाःस्थैरुत्थाय	12
द्वारेण वैजयन्तेन	12
धीशब्दस्तु भगवतः	8
धीशब्दाच्छुभ०	9
धीस्तु धर्मप्रदे धर्मे	8
धीस्तु विद्यात्म०	9
ध्येयत्वं च गुणः	6
नगराणि च राष्ट्राणि	11
न चाग्निजं भयं	11
नरेन्द्रसूनुर्नरदेव०	13
नानाभीत्यपहारित्वं	9
ना पुमान् नौर्जलोत्तारे	9
नारदं परिपप्रच्छ	12
नार्यश्चविधवेत्यत्र	11
नावमान्यो भवद्भिश्च	14
निःसीमाभ्यधिक०	9
निग्रहानुग्रहत्वाभ्यां	3
नियतात्मामहा०	6
निरामयो ह्यरोगश्च	11
नो चेत् सर्वज्ञशब्देन	6
पञ्चमेन पदेनैव	5
पराभिभूतिसामर्थ्यं	7
पूर्णं रामयणं श्लोकैः	11

प्रकाशित्वं च निखिलैः 5
प्रकाश्यन्ते रामकथा 10
प्रजापतिसमः श्रीमान् 5
प्रणम्य माधवारण्यं 7
प्रतिश्लोकसहस्रादौ 11
प्रत्युवाच ततो वाक्यं 13
प्रथममेन गुणाढ्यत्वं 5
प्रदर्शनं च बुद्धिश्च 14
प्रबन्धाद्यन्तयोः 7
प्रययौ भीमसंनादः 15
प्राप्तराज्यस्य रामस्य 15
प्रोज्झटायां प्रकृष्टार्थं 9
बलविष्करणं विष्णोः 8
ब्राह्मणस्य च धर्मेण 15
भः शंभौ भ्रमणे 8
भरतस्यान्तिकं राम 11
भर्त्रा परिगृहीतस्य 14
भीत्यभावे यमे मित्रे 8 9
भ्रातृभिः सहितः 15
मम भर्ता महातेजा 13
मरणान्तानि वैराणि 15
मोऽग्नौ जीवे 8
यकारः पूर्वपादान्तः 8
यस्मित्यय्ययमोंकारे 10
यशस्वी ज्ञानसंपन्नः 6
यस्त्यागे नित्ये 9
यात् स्त्रियां पदमञ्जर्यो: 9
येषामिन्दावरश्यामः 16
रक्षिता जीवलोकस्य 5
राक्षासा राक्षसेन्द्राय 14
रामः प्रीतिसमायुक्तः 14
रक्षोगणपरिक्षिप्तः 14
रेकारस्तु भगवतः 7
रेशब्दः पावके 8
लामस्तेषां जयस्तेषां 16
वक्ति पूर्ववकारोऽयं 7
वर्तते चोत्तमां वृत्तिं 12
वसतस्तस्य रामस्य 10
वान्तात् पूर्वो वर्णः 10
वायौ ज्ञाने बुधे 7
वाहने नरसंयुक्तं 12
वाल्मीकिरत्र 11
विज्ञाय तु मनस्तस्य 15
विद्यारण्यमुनीन्द्रेण 16
विभीषणादिवृत्तान्ते 6
विराधं राक्षसं हत्वा 10
विश्वक्षुषि व्योम्नि 7
विश्वामित्रो महातेजा 12
विष्णोरत्राखिलैश्वर्यं० 9
विसृज्य च महाबाहुः 15
वृत्तान्ते यौवराज्यादौ 2
वैश्ये विजयसामर्थ्ये 7
वोभीनिवारणे पूज्ये 7 8
व्याकरोम्यत्र गायत्री 7

शबरीशरभङ्गादि	6	समुच्चये चेतिशब्दः	9
श्रीमता राजराजेन	14	समुद्धृतं प्रबन्धान्ते	11
श्रीसंक्षेपेऽपि दृश्यन्ते	5	सर्वज्ञः सत्यसंधश्च	6
श्लोकोऽयं तप इत्यादि	11	सर्वदाभिमतः सद्भिः	5
श्रुत्वा हनुमतो वन्द्यं	14	सर्वलोकनियन्तृत्वं	9
षष्ठेन ध्येयध्येता०	5	सर्वलोकाधिपत्यं हि	9
संगतो वानरेणेति	10	सश्च सत्यप्रतिज्ञत्वं	7
संनिवृत्त्याहवात्	15	सामान्येन गुणाढ्यत्वं	6
संपूर्णं योजनशतं	12	स्यशब्देनोच्यते	8
संहर्तृता चात्र रिपु०	5	स्या गुणे स्यं भवे	8
स कामिनं दीनम्	13	सुग्रीवायेत्यत्र पदे	10
स जगाम वनं वीरः	10	सुप्रतिष्ठत इत्यन्ते	11
स तेन परमास्त्रेण	12	हनुवद्वचनाच्चैव	10
समस्तफलदातृत्वं	9	हिस्तु व्याधि०	5

अनुबन्धः (२)

विशेषपदानुक्रमः

अक्षर	7 8 9 11	अभिभाषित	14
अगर्जत्	10	अभिभूति	7
अग्नि	8 9	अभिमत	5
अग्निच	11	अभिषिच्य	10
अग्र	14	अभिषेचित	14
अत्युग्र	13	अभ्यधिक	9
अदीन	13	अरोग	11
अधिप	9	अर्क	7
अनघ	12	अर्थता	6
अनाथ	8	अवमान्य	14
अनुग्रह	6	अविधवा	11
अन्त	11	अव्यय	10
अन्तिक	11	अश्व	12
अन्तिम	7 9	अश्वमेध	11
अन्वेष्टु	13	अस्त्र	12
अपनोदन	8	अस्मदर्थ	9
अपहारित्व	9	आकाश	14
अप्सराः	12	आचरित	13
अभयदायि	7	आजग्मू	15
अभाव	8 9	आढच	5
अभिगत	5	आत्म	9
अभिपन्न	18	आत्मभू	10

आदान 7
आदि 10
आदिकाव्य 16
आदिकाव्यार्थ 16
आदिम 7
आदिवर्ण 7
आद्य 16
आद्यन्त 7
आद्यश्लोक 11
आधि 8
आधिपत्य 9
आनन्दकारित्व 8
आयुध 7
आलोडय 16
आविष्करण 8
आश्रित 8 14
आहव 15
इन्दीवर 16
इन्दु 8
इयेष 13
ईरित 5 6 8
ईश 8 9
ईशत्व 6
उटज 13
उत्तमा 12
उत्तर 14
उत्तरत्र 14
उत्तार 9
उत्साह 14
उत्स्मीय 10
उदीर्ण 13
उद्धृत 10 11
उपदेश 7
उपान्त 11
उमासुत 7
उष्यत 15
ऋक्ष 15
ऋषि 15
एकदेश 10 11
ऐश्वर्यप्रदत्व 9
ओंकार 10
ओज 14
कथासंग्रह 10
कर्शन 13
कलत्र 8 9
कल्याण 9
कान्ता 7
काम 7 8 9
कामी 13
कारणता 5
कारणत्व 5
कुम्भकर्ण 14
कृपा 8
कृष्णाजिन 13

कोप	13
क्षिप्त	12
खड्ग	10
खर	9
गः	8 10
गकार	8
गन्धर्व	8
गर्भित	11
गायत्री	11 16
गायत्रीपद	5
गायत्रीवर्ण	10
गायत्र्यक्षर	11
गायत्र्यादि	7
गीत	8
गुण	5 6 7
गुणपर	10
गुणप्रकरण	15
गुणाढ्यत्व	5
गुह्यतम	7
ग्रन्थ	10
घः	9
चकोर	9
चक्रादि	7
चक्षुस्	7
चरम	11
चातुर्वर्ण्य	6 11
चारण	13
चीर	13
चेतिशब्द	9
चोर	7 9
चोवर्ण	11
चोशब्द	9
छत्र	12
छेद	8
जटा	8
जटामण्डल	13
जन्मकर्तृत्व	6
जन्मा	13
जय	16
जल	9
जानकी	14
जीव	8
जीवलोक	5
जीवित	15
रीप्ति	8
ज्ञान	7
ज्ञानत्व	5 6
ज्ञानसंपन्न	5 6
ज्ञानात्मना	6
ज्ञानादिक	7
णः	8 10
णिकारः	8
तः	10
तद्	10

तप 11
तपस्वी 12
तारक 16
तुकार 7
तुः 7 10
तुलुप्क 9
तूणी 10
तेज 14
त्याग 8 9
दं 9
दः 9
दन्ती 14
दयावत् 12
दशग्रीव 6
दशब्द 9
दशवर्ष 11
दाक्षा 8 9
दान 8 9
दीन 8 13
द्वाः स्थ 12
द्वार 12
देकार 8 10
देशब्द
द्युतिमान् 6
द्विगुण 14
धनु 12
धर्म 6 8 15
धर्मप्रद 8
धर्मस्थापन 8
धाता 5 8 9
धीः 8 9
धीकार 11
धीर 14
धीशब्द 8 9 11
धृति 8
धृतिमान् 6
ध्येयता 5 6
ध्येयत्व 6
न 9
नः 9 11
नग 14
नगर 11
नरदेव 13
नरसंयुक्त 12
नरेन्द्र 13
ना 9
नाना 9
नान्त 10
नारद 10 12
नारी 11
निः सीम 9
निग्रह 6
नित्या 5
नियतात्मा 6

नियन्ता	9
निजत्तृता	5 6
नियन्तृत्व	6 9
नियामक	6
नियोक्ष्य	6
निरत	12
निरामय	11
निवारण	7 8
निर्वृत्त	15
निलय	8 9
निषूदन	5
निषेवण	7
निषेव्य	7
निस्त्रिंश	12
नीत	13
नौः	9
पक्षी	7
पथिन्	13
पद	9 13
पद्य	8
पर	7
परम	10 12
परमा	12
परमात्म	7
पराक्रम	11
पराभव	16
परिक्षिप्त	14
परिगृहीत	14
परिपप्रच्छ	12
परीहार	9
पावक	8
पितृशासन	13
पुनरुक्ति	6
पुरी	15
पूजा	15
पूज्य	7 8 10
पूर्ण	11
पूर्वज	13
पूर्वपद	8
पृथक्	11
पृष्ट	11 12
प्र	9 11
प्रकाशता	5 6
प्रकाशत्व	5
प्रकाशित्व	5
प्रकृतार्थ	7
प्रकृष्टार्थ	9
प्रजापति	5
प्रतिनन्दितुं	15
प्रतिपादित	5 6
प्रतिश्लोक	11
प्रत्यक्षर	16
प्रदर्शन	14
प्रबन्ध	7 10 11 16

प्रभ	15
प्रमुमोद	15
प्रयोजन	15
प्रविष्ट	13
प्राचोदयत्	15
प्रीत	10
प्रीति	14
प्लवगर्षभ	13
फलदात्	9
फलप्रद	9
बल	8 14
बुध	7
बुद्धि	14
ब्रह्म	16
ब्रह्मगुण	5 10
ब्रह्महेतु	7
ब्रह्मा	18 15
भः	8
भकार	10
भक्त	6 7 8
भय	11
भरत	11
भर्ता	3 13 14
भव	8
भाव	8
भीः	7 8
भीति	8 9
भीम	15
भूय	12
भ्रमण	8
भ्राता	15
मः	11
मकार	10
मञ्जारी	9
मनः	15
मन्त्रवर्ण	7 11 16
मन्त्रवाच्य	5
मन्त्रान्त	16
मरण	15
महत्	12
महती	16
महागुण	14
महातप	12
महातेज	12
महात्मन्	18 14 15
महाबाहु	15
महावीर्य	6
मा	8
माधवारण्य	7
मान	7
मानव	12
मित्र	8 9
मुनिपुंगव	12

मेनका	12	रामकथा	14
यं	10	रामानुज	13
यंवर्ण	10	रामायण	11
यः	8 9	रावण	13 14
यकार	8	राष्ट्र	11
यथावत्	14	रिपु	5
यद्	9	रुचिरत्	15
यद्वय	9 11	रेकार	7 10
यम	8 9	रेशब्च	7
यशस्वी	6	लक्ष्मीः	10
यात्	9	लक्ष्मण	12
युधू	9	लङ्का	14
योजन	12	लयकर्तृता	16
यौवराज्य	6	लाभ	12 16
रक्षःपतिः	15	बः	7 8 10
रक्षिता	15	वकार	7 8
रक्षोगुण	14	वक्ति	7
रजनी	15	वध	15
रत	6	वन	10 12
रथ	12	वय	13
रहस्य	16 16	बर	12
राघव	14 15	वर्ण	10
राक्षस	10 14 15	वर्ष	13
राक्षसेन्द्र	14	वल्कल	13
राजराज	14	वल्मीकभू	16
राजा	14	वशिशब्द	6
राज्य	15	वशी	6

वश्य	6
वश्यत्व	5 6
वश्यशब्द	6
वाक्य	13 14
वाग्वित्	12
वाचक	8
वाची	6
वात	7
वानर	6 10 15
वान्त	10
वायु	7
वाल्मीकि	11 12
वास	7
वासा	13
वाहन	12
विः	7 10
विकार	7
विक्रम	14
विषय	7 12
विद्यात्म	9
विपुल	14
विबोध्य	7
विभीषण	6 14
विराध	10
विशारद	13
विशेष	7
विश्वामित्र	7 12
विश्वास	8 9
विषय	7
विसृज्य	15
विसार	7
वीर	10
वीर्य	14
वृत्तान्त	16
वृत्ति	12
वेदसार	16
वैजयन्त	12
वैद्य	8
वैर	15
वैश्य	7
व्यक्त	8
व्याचकार	11
व्यञ्जनाक्षर	16
व्याधि	9
व्याधिनाश	8
व्याधिहर	8
व्योम	7
शंभु	8
शत्रु	13
शबरी	6
शरण्य	5 8
शरण्यता	8
शरण्यत्व	5 6
शरभङ्ग	6

राशी 12
शुचि 6
शुभ 6
शूर 8
शोक 13
शोभा 10
श्याम 16
श्रान्त 12
श्रीः 8 9
श्रीमत् 11
श्रीमान् 5 12 14
श्रीसंक्षेप 5
श्रुतिमत्
संगत 10
संग्रह 7
संनाद 15
संनिभ 12
संनिवृत्त 15
संपन्न 6
संप्रदाय 7
संप्लव 12
संस्कार 15
संहर्तृता 5
संहृष्ट 13
सः 7 10
सकाश 15
सत् 5
सत्यज्ञानादि 7
सत्यप्रतिज्ञा 7
सत्यप्रतिज्ञत्व 7
सत्यसन्ध 6
सत्यव्यक्त 8
सत्त्व 13
सदाचार 9
सद्वृत्ति 9
समाधिमत् 6
समाहित 12
समुच्चय 9
समुद्धृत 10
समुद्र 5
सर्वज्ञ 5
सर्वज्ञपद 6
सर्वज्ञशब्द 6
सर्वभूत 12
सांप्रदायिक 12 16
सागर 12
सान्त्व 7 8
सामर्थ्य 7
सिद्धार्थ 11
सिन्धु 5
सीता 13
सुख 9
सुखी 15
सुग्रीव 10

सुत 15
सुधार्मिक 11
सुप्रतिष्ठित 11 16
सुविस्तर 11
सूत 15
सूनु 13
सेव्य 8 15
स्कन्ध 14
स्थल 10 11
स्थानप्राप्ति 9
स्थित 6 15
स्फुट 5
स्मृति 7 8 9 14
स्यं 8 10
स्यः 8
स्य 11
स्यशब्द 8
स्या 8
सष्टता 5
स्वाध्याय 12
हत्वा 10
हय 15
हरि 14
हरिवर 10
हर्षप्रद 8
हनुमान् 10 13 14
हिः 8 9
हिंकार 11
हित 6
हृदय 16
हेतु 9
हेतुत्व 9